# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेश परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – १-२-२००९ अङ्कः–१००

पूर्वाह्णे – १०-०० तः १-०० पर्यन्तम् समयः–घण्टात्रयम्

**1 पञ्चानां प्रश्नानां एकैकवाक्येन उत्तरं लिखत ।** 8

१. श्रीशङ्करभगवत्पादाः कं अपनेतुं प्रार्थयन्ति ?

२. करुणालहरी केन विरचिता ?

३. द्विजवधूः कस्मिन् वयसि शङ्करस्य उपनयं अकारयत् ?

४. पौरुषेययुता इव के चकाशिरे ?

५. अत्रेस्तनयः कः ?

६. कार्यं केन विना न सम्भवति ?

७. अहर्पतिकुलतिलकः कः ?

**2 पञ्चानां प्रश्नानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

१. वन्दे वाच्छितेति मङ्गलपद्यस्य वैशिष्ट्यं वर्णयत ।

२. विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानं किम् ?

३. शकुन्तलायै केन शापः दत्तः? सः कथं निवर्तिष्यते ?

४. राजा युधिष्ठिरः अधोक्षजं किमब्रवीत् ?

५. उद्धवरामौ प्रति श्रीकृष्णस्य वचनं वर्णयत ।

६. पितामहः शप्तां सरस्वतीं कथं सान्त्वयामास ?

७. राजाधिराजमन्त्रिणः चाणक्यस्य गृहावस्थां वर्णयत ।

**3 पञ्चषैः वाक्यैः द्वयोः उत्तरं लिखत ।** 8

१. शकुन्तलायाः आश्रममृगलतादिषु प्रीत्यतिशयं वर्णयत ।

२. रावणं प्रति हनूमद्वचनानि संक्षेपेण लिखत ।



पश्चादनुवर्तते

३. भीष्मस्य अध्यात्मतत्वोपदेशान् संक्षेपेण लिखत ।

४. अमरावत्याः वैभवं संक्षेपेण वर्णयत ।

**4 वाक्यत्रयं सप्रसङ्गं व्याख्यात ।** 9

१. क्षमा हि मूलं सर्वतपसाम् ।

२. तदपि प्रवर्तयति मां शङ्करपारम्यसङ्कथालोभः ।

३. नहि प्रयोजनमनपेक्षमाणः स्वप्नेऽपि चाणक्यश्चेष्टते ।

४. क इदानीमुष्णोदकेन नवमालिकां सिञ्चति ।

५. धनेन विना समुच्छ्वसितुमपि नालमस्मिन् लोके ।

**5 द्वयोः भावं स्पष्टयत ।** 8

१. भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः ।
परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते ।।

२. आस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन -
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ।।

३. अमुना तनयेन भूषितं यमुनातातसमानवर्चसा ।
तुलया रहितं निजं कुलं कलयामास स पुत्रिणां वरः ।।

**6 श्लोकद्वयं पूर्णं लिखत ।** 4

१. सत्यपि .................. तारङ्गः ।।

२. विहाय ............................. गाढमीहते ।।

३. सुरासुरस्वान्त ................................ चन्द्रिका ।।

**7 अनयोरन्यतरस्य कवेः देशकालकृतिवैशिष्ट्य विषये लिखत।** 4

१. माघः २. भोजराजः

8 **एकस्य लघुटिप्पणीं लिखत ।** 4

१. काश्यपः  २. चाणक्यः

9 **चत्वारिपदानि वाक्ये योजयत ।** 4

१. मनसिकृत्य  २. आमयः  ३. अभ्याशे

४. आरूरोह  ५. अजातशात्रुः  ६. श्रोतुम्

10 **चतुर्णां रूपाणि विवेचयत ।** 4

१. शन्तनुना  २. प्रत्यभाषत  ३. सुपर्वणाम्

४. विजयवर्मा  ५. निरुप्य  ६. निर्वर्तयामास

11 **चतुर्णां पर्यायपदानि लिखत ।** 4

१. वैवस्वतः  २. विभावरीचरपतितनूजः  ३. बर्हिः

४. त्रिविष्टपम्  ५. हायनः  ६. त्रपा

12 **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

१. दामोदरः  २. द्विजगृहे  ३. उद्धवसीरिभ्याम्

४. द्वित्राः  ५. अधिकाव्यम्  ६. अविकत्थनाः

13 **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

१. गुर्वपि  २. देवश्चन्द्रगुप्तः  ३. संनहनस्तव

४. सोऽयम्  ५. तूत्तरायणे  ६. कुर्वन्नन्यान्

14 **चतुर्थं पदं लिखत ।** 4

१. दाशरथिः - रामः ; पवनतनयः ———— ।

२. सत्यं - वद ; धर्मम् ———— ।

३. हर्षचरितम् - बाणः ; भीष्मविजयः ———— ।

४. बहुव्रीहिः - अन्यपदार्थप्रधान ; तत्पुरुषः ———— ।



पश्चादनुवर्तते

**15** **इतरवचनरूपाणि लिखत ।** 4

१. पन्थाः .............. ................ ।

२. .............. .............. भूतयः ।

३. .............. सुपर्वाणौ ............... ।

४. वार्धके ................ ................ ।

**16** **द्वयोः व्याकरणविशेषं निर्दिशत ।** 4

१. मह्यमपराध्यति २. जनता

३. त्वद्गात्रं परितः ४. युधिष्ठिरः

**17** **रिक्तस्थानं पूरयत ।** 4

१. .................. जात्यैव द्विजन्मानो माननीयाः ।

२. राजशब्दोऽपि ............... विना कथं अर्थवान् भवति ।

३. पीड्यन्ते गृहिणः कथं नु ................. नवैः ।

४. करुणा किं न ................. मानसम् ।

**18** **प्रयोगं परिवर्तयत ।** 3

१. मारुतिना रावणः बोधितः ।

२. चन्द्रगुप्तः वः समाज्ञापयति ।

**19** **क्रियापदद्वयं सर्वपुरुषवचनेषु लिखत ।** 6

१. जहास २. अकरोत् ३. हरिष्यति ४. कथ्यताम्

★★★★★

# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेश परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः – १-२-२००९ अङ्काः–५०

अपराह्णे – १-३० तः ३-०० पर्यन्तम् समयः–सार्धैकहोरा

**1 द्वावुत्तरयत ।** 8

१. क्त – क्तवतु प्रत्ययौ – उदाहरणपूर्वकं विवृणुत ।

२. प्रेरणार्थकक्रियापदानि कानि ? वाक्यरूपोदाहरणैः निरुपयत ।

३. विकरणप्रत्ययसहितान् धातूनां दशगणान् लिखत ।

**2 द्वावुत्तरयत ।** 8

१. समासः कतिविधः ? अव्यतीभावसमासं सोदाहरणं विवृणुत ।

२. रुपकालङ्कारस्य लक्षणं सोदाहरणं विवृणुत ।

३. कृत्वा पुंवत्पातमुच्चै र्भुगुभ्यो – अत्रत्यं वृत्त सलक्षणं सोदाहरणं निरुपयत ।

**3 चतुर्णां वाक्यानां प्रयोगं व्यत्यस्यत ।** 4

१. धर्मतत्त्वं सर्वैः जानन्तु ।

२. गुरुभिः अत्रैव स्थीयते ।

३. भक्ताः भगवन्तं वरान् याचन्ते ।

४. धर्मराजः भीष्मं वदति ।

५. मार्कण्डेयः यमस्य पाशात् अबिभेत् ।

**4 चतुर्णाम् अन्यलिङ्गरूपाणि लिखत ।** 4

| | | |
|---|---|---|
| १. गायन् | २. त्यक्तवान् | ३. श्रोता |
| ४. कर्मकरः | ५. कुर्वन् | ६. सेवकः |

**5 दोषान् समीकुरुत ।** 5

१. गुरुः माणवकस्य धर्मं ब्रूते ।

२.शिष्यः पाठशालां यान्ति ।



पश्चादनुवर्तते

३. अहं देवं स्पृहयामि ।
४. रामस्य कलत्रा सीता ।
५. कामधेनुं नमः ।

**6** **त्रयाणां तत्तल्लकारस्य सर्वाणि रूपाणि लिखत ।** 9

| | | |
|---|---|---|
| १. भिनत्ति | २. रुरोद | ३. ब्रूते |
| ४. शक्नोतु | ५. तनुयात् | ६. द्वेक्ष्यति |

**7** **षण्णाम् अनुवादं कुरुत ।** 6

१. चात्राः भक्त्या आचार्यं प्रणम्य ततः अध्ययने प्रवर्तन्ते ।
२. गोपालकाः क्षीरं दुधुक्षन्ति ।
३. यः प्रीणयेत् सुचरितैः पितरं स पुत्रः ।
४. वृक्षात् दश फलानि भूमिमकृष्यन्त ।
५. दुरात्मा रावणः देवाङ्गनाः कारायाम् अबधात् ।
६. कथं नाम प्रभोरादेशम् उल्लङ्घयितुं शक्नुयाम् ?

**8** **षण्णाम् संस्कृतेनानुवादं कुरुत ।** 6

१. ಜನಕರಾಜನು ತನ್ನ ಮಗಳಾದ ಸೀತೆಯನ್ನು ರಾಮನಿಗೆ ಕೊಟ್ಟನು.
Janaka Raja gave his daughter Sita to Rama.

२. ಸಾಧುಗಳು ಗಂಗಾನದಿಯಲ್ಲಿ ಸ್ನಾನ ಮಾಡುತ್ತಾರೆ.
Sadhus are taking both in Ganga River.

३. ನಾನು ಈ ದೊಡ್ಡ ಸಮುದ್ರವನ್ನು ದಾಟಲು ಶಕ್ತನಲ್ಲ.
I am incapable of crossing this big Sea.

४. ವಿದ್ವಾಂಸರು ತಮ್ಮ ಉಪದೇಶಗಳಿಂದ ಜನರ ಸಂಶಯಗಳನ್ನು ಭೇದಿಸುತ್ತಾರೆ.
Scholars bear doubts of people by their advice.

५. ರಾಜಕೀಯ ಅಧಿಕಾರಿಗಳು ಲಂಚವನ್ನು ತೆಗೆದುಕೊಳ್ಳಬಾರದು.
Government officers should not take bride

६. ನೀನು ಈಗಲೇ ಅಲ್ಲಿಗೆ ಹೋಗಲು ಇಚ್ಛಿಸುತ್ತೀಯಾ ?
Do you wish to go there now ?

★★★★★